N. A.
Vedoktashivarchan
वेदोक्तशिवार्चन
Sanskrit
Paper - Printed
1963 Sambat (112 years old)
24 Folio
10.5" x 4.8"
Complete

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ अथ वेदोक्तशिवार्चनप्रारंभः ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

३४३ नंबर ३४३६०७८

CC-0.Jangamwadi Math Collection. Digitized by eGangotri



CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ॐश्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ हस्तौपादौप्रक्षाल्य ॥ आस
नारोहणं कृत्वा ॐभूर्भुवःस्वः इत्याचमनम्।ॐनमःशिवायेतित्रिवारं
पठेत् ॥ त्र्यम्बकमितिमंत्रेण विभूतिधारणम् ॥ पीठेलिंगस्थापनम् ॥
गणपत्यादिमंडलेअक्षतपुंजस्थापनम्। ततःस्वस्तिवाचनम्। प्रतिज्ञा
संकल्पः। गणपतिपूजनम् ॥ ततोवरणसंकल्पः। ततः नंदिवीरभद्रौ
स्वामिकार्तिकंकुबेरंकीर्तिमुखंचपूजयेत् ॥ ॐस्वस्तिनऽइन्द्रोवृद्धश्रवाः
स्वस्तिनः पूषाविश्ववेदाः ॥स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्ति
नोबृहस्पतिर्दधातु॥१॥पयः पृथिव्याम्पयऽओषधीषुपयोदिव्यन्तरिक्षे

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

शि० १

पयोधाः॥ पयस्वतीः प्रदिशः सन्तु मह्यम्॥२॥ विष्णोरराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्द्रुवोसि॥ वैष्णवमसि विष्णवे त्वा॥३॥ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवता दित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता॥४॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः॥ वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥५॥ सुशान्तिर्भवतु॥ ओम् विश्वानि देव सवितर्दुरितानि परासुव॥ यद्भद्र

चर्चनं- १

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्तन्नऽआसुंव ॥ ६ ॥ इमारुद्रायंतुवसेंकपर्दिनेंक्षयद्वीरायप्रभंराम
हेमतीः ॥ यथाशमंसद्विपदेचतुंष्पदेविश्वंम्पुष्टङ्ग्रामेंऽअस्मिन्ननातुर
म्॥७॥एतन्तेंदेवसवितर्य्यज्ञम्प्राहुर्बृहस्पतयेब्रह्मणें ॥ तेनंयज्ञमंव
तेनंयज्ञपतिन्तेनुमामंव ॥ ८ ॥ मनोंजूतिर्ज्जुषतामाज्ज्यंस्यबृहस्प
तिर्य्यज्ञमिमन्तनोत्त्वरिष्टँयज्ञ ठ्सामिमन्दधातु ॥ विश्वेंदेवासऽइह
मांदयन्तामोऽ३ म्प्रतिष्ठ ॥ ९ ॥ एषवैप्रतिष्ठानामयज्ञोयत्रैतेनयज्ञेनय
जन्तेसर्वमेवप्प्रतिष्ठितम्भवति ॥ १० ॥ गणानान्त्वागणपतिठ्हवाम
हेप्प्रियाणान्त्वाप्प्रियपतिठ्हवामहे निधीनान्त्वानिधिपातिठ्हवामहे

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वसोमम ॥ आहमंजानिगर्भुधमात्त्वमंजासिगर्भुधम् ॥ ११ ॥ नमो
गणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोन
मोनमोगृत्त्सेभ्योगृत्त्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्व
रूपेभ्यश्चवोनमः॥१२॥ सुमुखश्चैकदंतश्चकपिलोगजकर्णकः ॥ लं
बोदरश्चविकटोविघ्ननाशोविनायकः ॥ १३ ॥ धूम्रकेतुर्गणाध्यक्षोभा
लचंद्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ १४ ॥
विद्यारम्भेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्य
नजायते ॥ १५ ॥ ॐभूर्भुवःस्वःअत्रमंडलेइहागच्छसुप्रष्ठितोवरदो

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भव ममपूजांगृहाणश्रीगणाधिपतयेनमः इत्यक्षतान्क्षिपेत् ॥ अथ
संकल्पः ॥ ॐतत्सदद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैव
स्वतमन्वंतरे अष्टाविंशतितमेयुगे कलौप्रथमचरणे जंबूद्वीपेभारतखंडे
आर्यावर्त्तैकदेशेअमुकसंवत्सरे अमुकऋतौअमुकमासे अमुकपक्षेअ
मुकतिथौअमुकवासरे यथायोगकरणमुहूर्ते वर्तमानेएवंगुणविशेषेण
विशिष्टायांशुभपुण्यतिथौ अमुकगोत्रः अमुकशर्माऽहंश्रुतिस्मृतिपुरा
णोक्तफलप्राप्तिकामश्चतुर्वर्गफलप्राप्त्यर्थंप्रदोषादियामचतुष्टयाधिक
रणकरुद्रीपाठसहितंचतुष्कृत्वाअमुकशिवपूजनमहंकरिष्येतदंगत्वे

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नगणपत्यादिपूजनंचकरिष्ये इतिसंकल्प्य ततोविश्वानिदेवसवित
रितिपंचप्रतिष्ठामंत्रान्पठेत्।ॐगणानात्वेतिमंत्रेणावाहनपुष्पासनपा
द्यार्घ्याचमनीयस्नानीयपुनराचमनीयवस्त्रयज्ञोपवीतगंधाक्षतपुष्पधू
पदीपनैवेद्यतांबूलदक्षिणानमस्कारप्रदक्षिणाजपइत्युपाचारैर्गणपति
पूजयेत् । मूलमंत्रस्यजपः । ततःप्रार्थना नमोगणेभ्यो ० सुमु
खश्चैकदंतश्च०वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ निर्विघ्नंकुरुमे
देवसर्वकार्येषुसर्वदेतिचपठेदितिगणपतिपूजनम्॥ततोवरणसंकल्पः
ॐतत्सदद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

अष्टाविंशतितमेयुगेकलौप्रथमचरणेजंबूद्वीपेभारतखंडेआर्यावर्त्तैकदे
शेअमुकसंवत्सरेअमुकर्तौअमुकमासेअमुकपक्षेअमुकतिथौअमुक
वासरेअमुकनक्षत्रेयथायोगकरणमुहूर्त्तेवर्तमानेएवंगुण० अमुकगो
त्रः अमुकशर्माश्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामोहंचतुर्वर्गफलप्रा
प्त्यर्थकर्त्तव्यप्रदोषादियामचतुष्टयाधिकरणकरुद्रीपाठसहितंचतुष्कृ
त्वा अमुकशिवपूजनंब्राह्मणद्वारा कारयितुमेभिर्वरणद्रव्यैर्यथानाम
गोत्रान्यथापरिमितब्राह्मणानहंवृणे ॥ व्रतेनदीक्षामाप्नोतिदीक्षया
प्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते ।

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

इतिब्राह्मणोवदेत्॥ततःनंदीश्वरपूजनंकुर्यात् । अद्येत्याद्युक्त्वाअमुक
लिंगपूजांगत्वेननंदीश्वरपूजांकरिष्ये ॥ ॐआयङ्गौःपृश्निरक्रमीदसं
दन्मातरंम्पुरः ॥ पितरंञ्चप्रयन्त्स्वः । इतिमंत्रेण । षोडशोपचारै
र्नंदीश्वरंपूजयेत् । ततः प्रार्थना । प्रैतुंवाजीकनिक्रदन्नानदद्रासंभृ
पत्त्वां ॥ भरंन्नग्निम्पुरीष्यम्मापाह्यायुषःपुरा ॥ इतिनंदीश्वरपूजनम्
॥ १ ॥ ततोवीरभद्रपूजनम् ॐअद्येत्याद्युक्त्वावीरभद्रपूजनंक० ॥ ॐ
भद्रङ्कर्णेभिःशृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तु
ष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः । इत्यावाहनादिषोडशो

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पचारैर्वीरभद्रंपूजयेत् ॥ ततःप्रार्थना ॥ भुद्रोनोऽअग्निराहुतोभुद्रारा
तिःसुभगभुद्रोऽअध्वरः ॥ भुद्राऽउतप्प्रशस्तयः॥इतिवीरभद्रपूजनम् ।
ततःस्वामिकार्तिकपूजनम् ॥ अद्येत्यादिपूर्ववत्॥ ॐयदक्रन्दःप्प्रथ
मञ्जायमानऽउद्यन्त्समुद्राद्वुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबा
हूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ॥ इतिमंत्रेणषोडशोपचारैःस्वामि
कार्तिकंपूजयेत्॥ ततःप्रार्थना॥यत्रबाणाःसम्पतन्तिकुमाराविशिषाऽ
इवातन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मयच्छतुद्विश्वाहाशर्म्मयच्छतु
इतिस्वामिकार्त्तिकपूजनम्॥ ततःकुबेरपूजनं॥अद्येत्यादिपूर्ववत्संक

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ल्प्य । ॐकुविदङ्गयवंमन्तोयवंश्चिद्यथादान्त्यंनुपूर्वंवियूयं ॥इहेहैषांकृ
णुहिभोजंनानियेबर्हिषोनमंऽउक्तिंयजंन्ति ॥ इतिमंत्रेणषोडशोपचा
रैः कुबेरंपूजयेत् ॥ ततःप्रार्थना ॥ वयꣳसोमव्रतेतवमनंस्तनूषुबिभ्र
तः ॥ प्रजावंन्तःसचेमहि ॥ इतिकुबेरपूजनम् ॥ ततःकीर्तिमुखपूज
नम् ॥ अद्येत्यादि० ॐ असंवेस्वाहावसंवेस्वाहाविभुवेस्वाहाविवस्व
तेस्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहाधिपतये स्वाहा
शूषायस्वाहासꣳ सर्प्पायस्वाहाचन्द्रायस्वाहाज्योतिषेस्वाहामालि
म्लचायस्वाहादिवापतयेतेस्वाहा ॥ इतिमंत्रेणषोडशोपचारैःकी

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

र्तिमुखंपूजयेत् । ततःप्रार्थना । ओजश्चमेसहश्चमऽआत्माचमेतनू
श्चमेशर्म्मचमेवर्म्मचमेङ्गानिचमेस्थीनिचमेपरूꣳषिचमेशरीराणि
चमऽआयुश्चमेजुराचमेयज्ञेनकल्पन्ताम् ॥ इतिकीर्तिमुखपूजन
म् ॥ अथात्मविन्यासः ॥ १ ॥ ॐयातेरुद्रशिवातनूरघोरापापका
शिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ शिखा
याम् ॥ १ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाꣳसहस्र
योजनेवधन्वानितन्मसि ॥ शिरसि ॥ २ ॥ असंङ्ख्यातासहस्राणियेरु
द्राऽअधिभूम्म्याम् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ललाटे ॥ ३ ॥ त्वयꣳ सोमन्त्वतेतवमनंस्तनूषुबिभ्रतः ॥ प्रजावन्तः
सचेमहि ॥ भ्रुवोर्मध्ये ॥ ४ ॥ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिव
र्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ नेत्रयोः
॥ ५ ॥ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योर्ज्योतिर्ज्योतिःसू
र्य्यःस्वाहा ॥ अग्निर्व्वर्च्चोर्ज्योतिर्व्वर्च्चःस्वाहासूर्य्योर्व्वर्च्चोर्ज्योतिर्व्वर्च्चः
स्वाहा ॥ ज्योतिःसूर्य्यःसूर्य्योर्ज्योतिःस्वाहा ॥ तृतीयनेत्रे ॥ ६ ॥
नमःस्रुत्यायचपथ्यायचनमःकाट्यायचनीप्प्यायचनमःकुल्याय
चसरस्यायचनमोनादेयायचवैशन्तायच । कर्णयोः ॥ ७ ॥ मान

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

स्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥ नासिकयोः ॥ ८ ॥ अवतत्त्वधनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानाम्मुखाशिवोनःसुमनाभव ॥ मुखे ॥ ९ ॥ नमोवश्चतेपरिवश्चतेस्तायूनाम्पतये नमोनमोनिषङ्गिणेऽइषुधिमते तस्करणाम्पतये नमोनमःसृकायिभ्योजिघाꣳसद्भ्योमुष्णताम्पतये नमोनमोसिमद्भ्योनक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥ ग्रीवायाम् ॥ १० ॥ नीलग्रीवाःशितिकण्ठादिवꣳरुद्राऽउपश्रिताः ॥ तेषाꣳसहस्रयोजनेवध

२

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

न्वानितन्नमसि ॥ कंठदेशे ॥ ११ ॥ नमस्तुऽआयुधायानांततायधृ
ष्णवे ॥ उभाभ्यामुततेनमोबाहुभ्यान्तवधन्वने ॥ बाह्वोः ॥ १२ ॥
येतीर्थानिप्रचरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाꣳसहस्रयोजनेव
धन्वानितन्नमसि ॥ हस्तयोः ॥ १३ ॥ नमोज्ज्येष्ठायचकनिष्ठाय
चनमःपूर्वजायचापरजायचनमोमध्यमायचापगल्भायचनमोज
घन्न्यायचबुध्न्यायच ॥ अंगुलिषु ॥ १४ ॥ नमःपूर्णायचपर्णशदाय
चनमऽउद्गुरमाणायचाभिघ्नतेचनमऽआखिदतेचप्रखिदतेचनमइषु
कृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवःकिरिकेभ्योदेवानाꣳहृदयेभ्योन

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

मोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः ॥ हृदये
॥ १५ ॥ नमोगणेभ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपति
भ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपे
भ्योविश्वरूपेभ्यश्चवोनमः ॥पृष्ठे॥ १६ ॥ विकिरिद्रविलोहितनम
स्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्यमस्मन्निवपन्तुताः ॥उद
रे ॥ १७ ॥ नमः शम्भवायचमयोभवायचनमः शङ्करायचमयस्क
रायचनमः शिवायचशिवतरायच ॥ दक्षिणकुक्षौ ॥ १८ ॥ द्रापेऽअ
न्धसस्पतेदरिद्रंनीललोहित । आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

रोङ्मोचनुःकिञ्चनामंमत् ॥ वामकुक्षौ ॥१९॥ हिरण्यगुर्भःसमंवर्त्त
ताग्रेंभूतस्यंजातःपतिरेकंऽआसीत् ॥ सदांधारपृथिवीन्द्यामुतेमाङ्क
स्म्मैदेवायंहुविषांविधेम ॥ नाभौ ॥ २० ॥ मीढुंष्टमुशिवंतमाशिवोनः
सुमनांभव ॥ पुरमेवृक्षऽआयुंधन्निधायुकृत्तिंवसांनुआंचरुपिनाकु
म्बिब्भ्रुदागंहि ॥ कृत्त्याम् ॥ २१ ॥ शिवोमांसिस्वधितिस्तेंपितान
मंस्तेऽअस्तुमामांहिर्ठ्सीः ॥ निवंर्त्तयाम्म्यायुंषेन्नाद्यांयप्प्रजनंनाय
रायस्प्पोषांयसुप्प्रजास्त्वायंसुवीर्य्यांय.॥ लिंगे ॥ २२ ॥ इमारुद्राय
तुवसेंकपर्दिनेंक्षुयद्वीरायुप्प्रभंरामहेमतीः॥ यथाशमसंद्विपदेंचतुष्प्प

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

देवि्वश्वम्पुष्टङ्गामेऽअस्मिन्ननातुरम् ॥ गुह्ये ॥२३॥ इषेत्त्वोर्ज्जेत्वा वायव
स्त्थदेवोवः ÷ सविताप्प्राप्पयतुश्रेष्ठतमायुकर्म्मणुऽआप्प्यायद्ध्वमघ्न्या
ऽइन्द्रायभागम्प्रजावतीरनमीवाऽअयुक्ष्मामावस्तेनऽईशतुमाघशꣳ
सोध्रुवाऽअस्म्मिन्नगोपतौस्यातबह्वीर्य्यजमानस्यपशून्न्पाहि ॥ वृषण
योः ॥ २४ ॥ मानोमुहान्तमुतमानोऽअर्भ्भकम्मानुऽउक्षन्तमुतमानं
ऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रियास्तन्वोरुद्ररी
रिषः ॥ ऊर्वोः ॥ २५ ॥ एषतेरुद्रभागःसुहस्वस्त्राम्बिकयातञ्जुषस्व
स्वाहैषतेरुद्रभागऽआखुस्तेपशुः ॥ जान्वोः ॥ २६ ॥ नमोज्ज्येष्ठायच

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कनिष्ठायंचुनमः ÷ पूर्व्वजायंचापरजायंचुनमोमध्यमायंचापगल्भायं
चुनमोजघन्न्यायचबुध्न्यायच ॥ जंघयोः ॥ २७ ॥ नमोऽहस्वायंच
वामुनायंचुनमोवृद्धायंचसुवृधेंचुनमोग्र्यायचप्रथमायंच ॥ गुल्फ
योः ॥ २८ ॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्ध्युधः÷ ॥ तेषांᳬसह
स्रयोजुनेवधन्न्वानितन्न्मासि ॥ पादयोः ॥ २९ ॥ अद्ध्यवोचदधि
वुक्ताप्रथमोदैव्योभिषक् ॥ अहीः÷श्चसर्वांअम्भयुन्त्सर्व्वाश्चयातुधा
न्न्योधराचीःपरासुव ॥ कवचे ॥ ३० ॥ नमोबिल्म्मिनेंचकवचिनेंचु
नमोवर्म्मिणेंचवरूथिनेंचुनमः÷श्रुतायंश्श्रुतसेनायंचुनमोदुन्दुभ्यांय

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

चाहनुन्न्यायच ॥ अस्त्रे ॥ ३१ ॥ ब्विज्ज्युन्धनुःकपर्दिनोब्विशल्ल्योबा
णवाः ॥ उत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गाधिः ॥ धनुषि
॥३२॥ यत्रबाणाःसम्पतन्तिकुमाराब्विशिखाऽइव ॥ तन्नऽइन्द्रोबृहस्प
तिरदितिःशर्मयच्छतु । ब्विश्वहाशर्मयच्छतु ॥ बाणे ॥३३॥ ब्विकि
रिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्न्यमुस्मि
न्निवपन्तुताः ॥खड्गे ॥३४॥ यऽएतावन्तश्चभूयांसश्चदिशोरुद्राब्वित
स्थिरे॥तेषांसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ दिग्बन्धनम्॥३५॥
एवंन्यासविधिंकृत्वाशिवोहमितिभावयेत् ॥ एवंशिवलिंगेपिन्यासवि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

धिंविधायध्यानादिकुर्यात् ॥ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचं
द्रावतंसंरत्नाकल्पोज्ज्वलांगंपरशुमृगवराभीतिहस्तंप्रसन्नम् ॥ पद्मासी
नंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यं विश्ववंद्यं निखिल
भयहरंपंचवक्त्रंत्रिनेत्रं ॥ इतिध्यात्वा।ॐमानोमहान्तमुतमानोऽअर्भ्भ
कम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातर
म्मानःप्रियास्तन्वोरुद्ररीरिषः ॥ अमुकाशिवलिंगायनमःआवाहनं
॥ १ ॥ यातेरुद्रशिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तम
यागिरिशन्ताभिचाकशीहि ॥ अमुकाशिवलिंगायनमः इतिप्रत्युपचा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

रंवदेत् ॥ पुष्पासनं० ॥ २ ॥ ॐयामिषुंगिरिशन्तुहस्तेबिभुष्यस्तं
वे ॥ शिवाङ्गिरित्रतांकुरुमाहिंसीःपुरुषंजगत् ॥ अमुकशिव ० ॥
पाद्यम् ॥ ३ ॥ ॐशिवेन वचसात्वागिरिशाच्छावदामसि ॥ यथानः
सर्वमिज्जगदयक्ष्मंठ्सुमनाऽअसत् ॥ अमु० शिव० अर्घः ॥४॥ ॐअ
ध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाअम्भयन्त्सर्वा
श्चयातुधान्योधराचीःपरासुव । अमुकशिव० आचमनं०॥५॥ॐअ
सौयस्ताम्म्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ॥ येचैनद्रुद्राऽअभितोदि
क्षुश्रिताःसहस्रशोवैषाठ्हेडऽईमहे॥अमुकस्नानं० ॥६॥ अथपंचामृ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तस्नानम् ॥ आप्प्यायस्वेति गौतमऋषिः सोमोदेवता गायत्रीछ
न्दः क्षीरस्नानेविनियोगः ॥६॥ ॐआप्प्यायस्वसमेतुतेविश्वतःसोमु
वृष्ण्यम् ॥ भवावाजस्यसङ्गथे ॥ ७ ॐपयः पृथिव्या
म्पयऽओषधीषुपयोदिव्यन्तरिक्षेपयोधाः । पयस्वतीःप्रदिशः सन्तु
मह्यम् । अमुक०पयःस्नानम् ० ॥ ८ ॥ असौयस्ताम्म्रोऽअरुणऽउत
बुभ्रुःसुमङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताःसहस्रशोवैषाꣳ
हेडऽईमहे ॥ ९ ॥ देवस्यत्त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांम्पूष्णोह
स्ताभ्याम् ॥ अमुक० शुद्धस्नानम् ॥१०॥ दधिक्राव्णइत्यस्यदधि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

क्राण्णऋषिः ॥ सुरभिर्देवताऽनुष्टुप्छन्दोदधिस्नाने विनियोगः ॥ ॐ
दधिक्राण्णोऽअकारिषमिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाक
रत्प्रणऽआयूꣳषितारिषत् ॥ अमुक० दधिस्नानम् ० ॥ ११ ॥ असौ
यः० ॥ १२ ॥ देवस्यत्वा० ॥ १३ ॥ शुद्धस्नानं० ॥ शुक्रमसीत्यस्य
यजुषःप्रजापतिर्ऋषिराज्यंदेवताऽनुष्टुप्छंदःआज्यस्नानेविनियोगः ॥
ॐशुक्रमसिज्योतिरसितेजोसि । ॐघृतवतीभुवनानामभिश्रियो
र्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवीवरुणस्यधर्मणाविष्कभि
तेऽअजरेभूरिरेतसा ॥ १४ ॥ घृतङ्घृतपावानःपिबतुवसांवसापावानः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

पिबतान्तरिक्षस्यहविरसिस्वाहा॥ दिशः प्रदिशऽआदिशोविदिशऽउ
द्दिशोदिग्भ्यःस्वाहा ॥ अमुक० घृतस्नानं० ॥ १५ ॥ ॐअसौयः०
॥ १६ ॥ देवस्यत्त्वा ० ॥ १७ ॥ शुद्धस्नानम्० ॥ मधुवाताऽइतिमं
त्रस्यगौतमऋषिर्मधुर्देवतागायत्रीछंदोमधुस्नानेविनियोगः ॥ ॐ
मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः॥माद्वीर्न्नःसन्त्वोषधीः॥१८॥
मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता॥१९॥
मधुमान्नोवनस्पतिर्म्मधुमाँ२॥ऽअस्तुसूर्य्यः॥ माद्धीर्गावोभवन्तुनः
॥ अमुक० मधुस्नानम्० ॥ २० ॥ ॐअसौयः० ॥ २१ ॥ देवस्य

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

त्त्वा० ॥ शुद्धस्नानं० ॥ २२ ॥ स्वादुःपवस्वेतिमंत्रस्यवेणुर्ऋषिः सो
मात्मिकाशर्करादेवताजगतीछंदःशर्करास्नानेविनियोगः ॥ ॐ स्वा
दुःपवस्वदिव्यायजन्मनेस्वादुरिन्द्रायसुहवीतुनाम्म्ने ॥ स्वादुर्म्मि
त्रायवरुणायवायवेबृहस्पतयेमधुमाꣳऽ ॥ ऽअदाभ्यः ॥ २३ ॥ ॐ
अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसंस्ययोरस
स्तँवोगृह्णाम्म्युत्तममुपयामगृहीतासीन्द्रायत्त्वाजुष्टंगृह्णाम्येषतेयो
निरिन्द्रायत्वाजुष्टतमम् ॥ अमुक० शर्करास्नानम् ॥ २४ ॥ ॐ
असौय० ॥ २५ ॥ देवस्यत्त्वा० ॥ अमुक० शुद्धस्नानम् ॥ २६ ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ॐअद्वर्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जम्भ
यन्त्सर्वाश्चयातुधान्योधराचीःपरासुव॥ पुनराचमनीयम्०॥२७॥
ॐअसौयोवसर्पतिनीलग्रीवोविलोहितः ॥ उतैनंङ्गोपाऽअदृश्रन्न
दृश्रन्नुदहार्य्यः सदृष्टोमृडयातिनः ॥ अमुक०वस्त्रम्० ॥२८॥ ॐप
रिधास्यैयशोधास्यैदीर्घायुत्त्वायजरदष्टिरिशतञ्चजीवामिशरदः
पुरूचीरायस्पोषमभिसंव्ययिष्ये ॥ वस्त्रेणकटिबन्धनम् ॥२९॥
ॐनमोस्तुनीलग्रीवायसहस्राक्षायमीढुषे ॥ अथोयेऽअस्यसत्त्वानो
हन्तेभ्योकरन्नमः ॥ यज्ञोपवीतमितिमंत्रस्यपरमेष्ठीऋषिस्त्रिष्टुप्छं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

दोलिंगोक्तादेवतायज्ञोपवीतपरिधानेविनियोगः ॥ ॐयज्ञोपवीतंपर
मंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् । आयुष्यमग्र्यंप्रतिमुञ्चशुभ्रंय
ज्ञोपवीतंबलमस्तुतेजः ॥ अमुकं०यज्ञोपवीतं० ॥ ३० ॥ ॐप्रमुंञ्च
धन्वंनुस्त्वमुभयोरार्त्न्योर्ज्ज्याम् ॥ याश्चंतेहस्तुऽइषंवःपरातामंग
वोवप ॥ ३१ ॥ गन्धोहैवास्यसुगन्धितेजन्तद्यत्सुगन्धितेजनम्भवति
गन्धेनैवैनमेतत्समर्द्धयति अमुक०॥ गंधं० ॥ ३२ ॥ ॐअक्षुन्नमीमद
न्तुह्यवंप्रियाऽअधूषत ॥ अस्तोषतुस्वभानवोविप्रानविष्ठयामतीयो
जान्विन्द्रतेहरी ॥ अमुकं०अक्षतान्० ॥ ३३ ॥ ॐविज्ज्युन्धन्नृःकप

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

र्द्दिनोविशल्ल्योबाणवाँ२॥ऽउत ॥ अनेशन्नस्युयाऽइषवऽआभुरस्यनि
षङ्गधिः॥३४॥ॐयाःफलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः।
बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः॥ अमुक० पुष्पाणि०॥३५॥
नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः श्रुतायचं
श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्यायच ॥ ३६ ॥ अमृतोद्भ
वंश्रीवृक्षंशंकरस्यसदाप्रियम् ॥ तत्तेशम्भोप्रयच्छामिबिल्वपत्रंसु
रेश्वर ॥ त्रिशाखैर्बिल्वपत्रैश्चअच्छिद्रैःकोमलैःशुभैः ॥ तवपूजांक
रिष्यामिअर्पयेपरमेश्वर ॥ गृहाणबिल्वपत्राणिसपुष्पाणिमहेश्वर ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सुगन्धीनिनवानीशाशिवत्वंकुसुमप्प्रिय ॥ बिल्वपत्राणि० ॥ ३७ ॥
यातेहेतिम्मीढुष्टमु हस्तेबुभूवतेधनुः ॥ तयास्म्मान्विश्श्वतस्त्वमयु
क्ष्मयापरिभुज ॥ ३८ ॥ धूरसिधूर्व्वधूर्व्वन्तन्धूर्व्वन्तंठ्योस्म्मान्धूर्व्वतित
न्धूर्व्वयँवयन्धूर्व्वामः ॥ देवानामसिव्वह्नितमुठ्ठसस्निन्नतमुम्पप्प्रितमु
श्रुष्टतमन्देवहूतम् ॥ अमुक० धूपं० ॥ ३९ ॥ परितेधन्वनो
हेतिरस्म्मान्वृणक्तुविश्श्वतः ॥ अथोयऽइषुधिस्तवारेऽअस्म्मन्निधेहि
तम् ॥ ४० ॥ अग्निर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिःसूर्य्यःस्वा
हा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा सूर्य्योव्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ज्योतिःसूर्य्यःसूर्य्योज्ज्योतिःस्वाहा॥अमुक० दीपं०॥४१॥अवतत्त्य
धनुष्ट्वꣳसहस्राक्षशतेषुधे ॥ निशीर्य्यशल्यानांमुखां शिवोनः सुम
नांभव ॥ ४२॥ अन्नंपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणं॥ प्रप्रंदातारं
न्तारिषऽऊर्ज्जन्नोधेहि द्विपदेचतुष्पदे ॥ अमुक० नैवेद्यम्० ॥४३॥अ
द्भ्यंवोचद्दधिवृक्ताप्रथमोदैव्यभिषक् ॥ अहींश्चसर्वांजम्भयन्त्सर्वा
श्चयातुधान्योधराचीःपरासुव ॥ अमुक० आचमनम् ॥ ४४ नमं
स्तुआयुधायानांततायधृष्णवे॥ उभाभ्यांमुततेनमोबाहुभ्यान्तवुध
न्वने ॥ अमु० मुखवासं ॥ ४५ ॥ नमः पुर्णायचपर्णशदायचनमऽउ

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

दुरमांणायचाभिग्घ्नतेचुनमंऽआखिदतेचंप्राखिदतेचुनमंऽइषुकृद्भ्यो
धनुष्कृद्भ्यंश्चवोनमोनमोवःकिरिकेभ्योदेवानाᳬहृदयेभ्योनमोवि
चिन्वत्केभ्योनमोविक्षिणुत्केभ्योनमंऽआनिर्हतेभ्यः ॥ अमु०
तांबूलम्० ॥ ४६ ॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽ
आसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥अ
मु० दक्षिणा० ॥४७॥ अथध्यानम् ॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंच
वक्त्रकम् ॥ गंगाधरंदशभुजंसर्वाभरणभूषितम् ॥ ४८ ॥ नीलग्रीवंश
शांकांकंनागयज्ञोपवीतिनम् ॥ व्याघ्रचर्म्मोत्तरीयंचवरेण्यमभयप्रद

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

म् ॥४९॥ कमंडल्वक्षसूत्राभ्यामन्वितंशूलपाणिनम् ॥ ज्वलंतम्पिंग
लजटाशिखमुद्योतकारणम् ॥५०॥ अमृतेनाप्लुतंहृष्टमुमादेहार्द्धधारि
णम् ॥ दिव्यसिंहासनासीनंदिव्यभोगसमान्वितम्॥५१॥ दिग्देवता
समायुक्तंसुरासुरनमस्कृतम् ॥नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययम्
॥ ५२ ॥ सर्वव्यापिनमीशानमेवंवैविश्वरूपिणम् ॥ गौरींचतुर्भुजांचं
डींत्रिनेत्रांमुकुटोज्ज्वलाम् ॥५३॥ पद्मदर्पणहस्तांचवरदाभयहस्तका
म्।दिव्यवस्त्रपरीधानांदिव्यालंकारभूषिताम्॥५४॥ प्रसन्नवदनांध्याये
च्छिवोत्संगेतुवामतः॥एवंध्यात्वाद्विजःसम्यक्ततोयजनमारभेत् ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

।५५।ततःपुष्पोदकेनतर्प्पयेत्।ॐभवंदेवंतर्प्पयामि।१ ।ॐशर्वंदेवंतर्प्प
यामि ॥ २ ॥ ॐईशानंदेवंतर्प्पयामि ॥३॥ॐपशुपतिंदेवंतर्प्पयामि ॥
॥ ४ ॥ ॐरुद्रंदेवंतर्प्पयामि ॥ ५॥ ॐउग्रंदेवंतर्प्पयामि ॥६ ॥ ॐभी
मंदेवंतर्प्पयामि॥७॥ॐमहांतंदेवंतर्प्पयामि॥ ८ ॥ॐदेवदेवंतर्प्पया०
॥९॥ॐज्येष्ठायनमः पुनराचमनीयम्० ॥ १ ॥ मधुपर्कंगृहाणेशसर्व
दामधुपर्कपः ॥ मधुपर्कप्रदानेनप्रीतोभवमहेश्वर ॥ ॐश्रेष्ठायनमः ॥
मधुपर्कं० ॥ २ ॥ ॐकालायनमः गंधं० ॥३॥ ॐकलविकरणायनमः
पुष्पाणि० ॥४ ॥ ॐसर्वभूतदमनायनमः धूपं० ॥५॥ ॐमनोन्मनाय

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

नमः दीपं० ॥ ६ ॥ ॐभवोद्भवायनमः नैवेद्यम्० ॥ ७ ॥ अथाष्टौपु
ष्पाञ्जलयः ॥ ॐभवायदेवायनमः ॥ १ ॥ ॐशर्वायदेवायनमः॥२॥
ॐईशानायदेवायनमः।३।ॐपशुपतयेदेवायनमः ॥४॥ ॐरुद्रायदेवा
यनमः ॥ ५ ॥ ॐउग्रायदेवायनमः ॥ ६॥ॐभीमायदेवायनमः॥७॥
ॐमहतेदेवायनमः॥८॥ॐभवस्यदेवस्यपत्न्यैनमः ॥१ ॥ॐशर्वस्य
देवस्यपत्न्यैनमः ॥ २ ॥ ॐईशानस्यदेवस्यपत्न्यैनमः॥३॥ॐपशुप
तेर्देवस्यपत्न्यैनमः॥४॥ॐरुद्रस्यदेवस्यपत्न्यैनमः॥५ ॥ॐउग्रस्यदे
वस्यपत्न्यैनमः ॥६॥ ॐभीमस्यदेवस्यपत्न्यैनमः॥७ ॥ ॐमहतोदे

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

वस्यपत्न्यैनमः ॥ ८ ॥ ॐअघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥
सर्वेभ्यःसर्वशर्वेभ्योनमस्तेऽस्तुरुद्ररूपेभ्यः ॥ १ ॥ ॐतत्पुरुषायवि
द्महेमहादेवायधीमहि ॥ तन्नोरुद्रः प्रचोदयात् ॥ २ ॥ ॐशर्वायक्षि
तिमूर्त्तयेनमः ॥ १ ॥ ॐभवायजलमूर्त्तयेनमः ॥ २ ॥ ॐरुद्राया
ग्निमूर्त्तयेनमः ॥ ३ ॥ ॐउग्रायवायुमूर्त्तयेनमः ॥ ४ ॥ ॐभीमायाका
शमूर्त्तयेनमः ॥ ५ ॥ ॐपशुपतयेयजमानमूर्त्तयेनमः ॥ ६ ॥ ॐम
हादेवायसोममूर्त्तयेनमः ॥ ७ ॥ ॐईशानायसूर्य्यमूर्त्तयेनमः ॥ ८ ॥
एवंसंपूज्य ॥ ततःसहस्रघटैः स्नपनम् ॥ ॐनमःशिवायेतिजपंकु

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

र्यात् ॥ ॐअस्यश्रीषडक्षरशिवमंत्रस्यवामदेवऋषिः पंक्तिश्छन्दः
सदाशिवोदेवता ॥ पुरुषार्थचतुष्टयसिद्ध्यर्थेजपेविनियोगः ॥
वामदेवायऋषयेनमः शिरसि ॥ १ ॥ पंक्तिच्छंदसेनमोमुखे ॥ २ ॥
सदाशिवायदेवतायैनमः हृदये ॥ ३ ॥ चतुर्विधपुरुषार्थसिद्ध्य
र्थेजपेविनियोगः ॥ इतिकृतांजलिर्वदेत् ॥ १ ॥ ॐहृदयायन
मः ॥ ॐनशिरसेस्वाहा ॥ २ ॥ ॐमःशिखायैवषट् ॥ ३ ॥
ॐशिकवचायहुम्॥४॥ ॐवानेत्रत्रयायवौषट्॥५॥ ॐयअस्त्रायफट्
॥ ६ ॥ एवंन्यासंकृत्वाषडक्षरस्तोत्रंपठेत् ॥ ॐकारंबिंदुसंयुक्तंनि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

त्यंध्यायंतियोगिनः ॥ कामदंमोक्षदंचैव ॐकारायनमोनमः॥१॥ न
जातिर्नमृतिर्यस्यक्षयोयस्यनविद्यते ॥ नमंतिदेवतास्सर्वानकारंतंन
माम्यहम् ॥२॥ महादेवंमहावक्रं महाध्यानपरायणम् ॥ महापापहरं
देवंमकारंतंनमाम्यहम्।३। शिवात्परतरोनास्तिशिवशास्त्रेषुनिश्चयः।
॥शमंतिसर्वपापानिशकारंतं नमाम्यहम् ॥ ४ ॥ वाहनंवृषभोयस्य
वासुकिःकंठभूषणम् ॥ वामेशक्तिधरंदेवं वकारंतंनमाम्यहम् ॥ ५ ॥
यत्रयत्रस्थितोदेवः सर्वव्यापीमहेश्वरः ॥ योगुरुः सर्वदेवानांयकारंतं
नमाम्यहम् ॥ ६॥ इदंषडक्षरस्तोत्रंप्रातरुत्थाय यः पठेत्॥मुच्यतेस

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

र्वपापेभ्यःशिवलोकंसगच्छति ॥ ७ ॥ इतिषडक्षरस्तोत्रम् ॥ हिरण्यु
गर्भःसमवर्त्तताग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवी
न्द्यामुतेमांकस्मैदेवायहविषाविधेम ॥ १ ॥ आरात्रिपार्थिवुठ्ठं
रजःपितरः प्रायिधामभिः ॥ दिवःसदाꣳसिबृहतीवितिष्ठसुऽओत्त्वे
षंवर्त्ततेतमः ॥ २ ॥ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्माणिप्रथमान्या
सन् ॥ तेहनाकंमहिमानः सचन्तुयत्रपूर्वेसाध्याः सन्तिदेवाः॥१॥ॐ
राजाधिराजायप्रसह्यसाहिने ॥ नमोवयंवैश्रवणायकुर्महे ॥ १ ॥ स
मेकामान् कामकामायमह्यम् ॥ कामेश्वरोवैश्रवणोददातु ॥ २ ॥ कु

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

बेरायवैश्रवणाय॥ महाराजायनमः॥ ॐ अग्निर्देवतावातोदेवतासूर्यो
देवताचन्द्रमादेवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेववि
श्वेदेवादेवता बृहस्पतिर्देवतेंद्रोदेवता वरुणोदेवता ॥ १ ॥ ॐमा
नोमहान्तमुतमानोऽ अर्भकम्मानऽउक्षन्तमुतमानऽउक्षितम् ॥ मा
नोवधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः ॥ १ ॥मा
नस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानो
वीरान्रुद्रभामिनोवधीर्हविष्म्मन्तःसदमित्वाहवामहे ॥ ॐनमोअस्तु
भगवान्विश्वेश्वरायमहादेवायत्र्यंबकायत्रिपुरुषायत्रिपुरांतकायत्रि

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

कालाग्निकालायकालाग्निरुद्रायनीलकंठायसर्वेश्वरायसदाशिवाय श्रीमहादेवायनमः ॥ मंत्रपुष्पांजलिंसमर्प्य आवाहनंनजानामि० यस्यस्मृत्या ० अनेन पूजनेनभगवान्श्रीअमुकेश्वरः प्रीयताम् । इति वेदोक्तशिवार्चनम् ॥ ॥ श्रीसाम्बसदाशिवार्पणमस्तु॥

ॐ नमो मृत्युञ्जयाय ॥ ॥ नान्दिकेश्वर उवाच॥ कैलासस्योत्तरेशृङ्गे शुद्धस्फटिकसान्निभे ॥ तमोगुणविहीनेतुजरामृत्युविवर्जिते ॥१॥ सर्वतीर्थास्पदाधारे सर्व्वज्ञानकृतालये ॥ कृताञ्जलिपुटोब्रह्माध्यानशीलंसदाशिवम् ॥ २ ॥ पप्रच्छप्रणतोभूत्वाजानुभ्यामवनीङ्गतः ॥ सर्व्वार्थसम्पदाधारम्ब्रह्मालोकपितामहः ॥३॥ ब्रह्मोवाच ॥ केनोपायेनदेवेशाचिरायुर्लोमशोभवत् ॥ तन्मेब्रूहिमहेशान लोकानां हितकाम्यया ॥ ४ ॥ श्री

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

सदाशिवउवाच॥शृणुब्रह्मन्प्रवक्ष्यामि चिरायुर्म्मुनिसत्तमः ॥ सञ्जातःकर्म्मणायेनव्याधिमृत्युविवर्जितः ॥
॥ ५ ॥ तस्मिन्नेकार्णवेघोरे सलिलौघपरिप्लुते ॥ कृतान्तभयनाशायस्तुतो मृत्युञ्जयः शिवः ॥६॥ तस्य
सङ्कीर्त्तनान्नित्यम्मुनिर्म्मृत्युविवर्ज्जितः ॥ तमेवकीर्तयेब्रह्मन्मृत्युञ्जेतुन्नसंशयः ॥ ७ ॥ लोमश उवाच ॥ दे
वाधिदेवदेवेशसर्व्वप्राणभृताँव्वर ॥ प्राणिनामपि नाथस्त्वम्मृत्युञ्जय नमोस्तुते ॥ ८ ॥ देहिनाञ्जीवभूतोसि
जीवोजीवस्यकारणम् ॥ जगतांरक्षकस्त्वँव्वैमृत्युञ्जय नमोस्तुते ॥९॥ हिमाद्रिशिखराकारसुधावीचिमनो
हर ॥ पुण्डरीकपरंज्योतिर्म्मृत्युञ्जयनमोस्तुते ॥ १० ॥ ध्यानाधारमहाज्ञानसर्व्वज्ञानैककारण॥पारित्राता
सिलोकानाम्मृत्युञ्जयनमोस्तुते ॥११॥निहतायेनकालेनसदेवासुरमानुषाः॥ गन्धर्व्वाप्सरसश्चैव सिद्धवि
द्याधरास्तथा ॥१२॥ साध्याश्चवसवोरुद्रास्तथाश्विनिसुतावुभौ ॥ मरुतश्चदिशोनागाःस्थावरा जङ्गमास्त
था॥१३॥जितःसोपित्वयाध्यानान्मृत्युञ्जयनमोस्तुते॥१४॥येध्यायन्तिपराम्मूर्त्तिम्पूजयन्त्यमराधिपम्।
नतेमृत्युवशंयान्तिमृत्युञ्जयनमोस्तुते ॥ १५ ॥ त्वमोङ्कारोसिवेदानान्देवानाञ्चसदाशिवः ॥ आधारशक्तिः

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

शक्तीनाम्मृत्युञ्जयनमोस्तुते॥१६॥स्थावरेजङ्गमेवापियावात्तिष्ठातिमेदिनी॥ जीवात्वित्याहलोकोयम्मृत्युञ्ज
यनमोस्तुते॥१७॥ सोमसूर्य्याग्निमध्यस्थव्योमव्यापिन्सदाशिव॥कालत्रयमहाकालमृत्युञ्जयनमोस्तुते॥
॥१८॥ प्रबुद्धेचाप्रबुद्धेचत्वमेवसृजसेजगत्॥ सृष्टिरूपेणदेवेशमृत्युञ्जयनमोस्तुते॥ १९॥ व्योम्नित्वंव्यो
मरूपोसितेजः सर्व्वत्रतेजसि॥प्राणिनांज्ञानरूपोसिमृत्युञ्जयनमोस्तुते॥२०॥ जगज्जीवोजगत्प्राणः स्रष्टा
त्वंजगतःप्रभुः॥ कारणंसर्व्वतीर्थानाम्मृत्युञ्जयनमोस्तुते॥२१॥ नेतात्वमिन्द्रियाणाञ्चसर्वज्ञानप्रबोधकः॥
साङ्ख्ययोगश्चहंसश्चमृत्युञ्जयनमोस्तुते॥२२॥ रूपातीतः सुरूपश्चपिण्डस्थपदमेवच॥ चतुर्य्युगकलाधार
मृत्युञ्जयनमोस्तुते॥२३॥ रेचकेवह्निरूपोसि सोमरूपोसिपूरके॥ कुम्भकेशिवरूपोसिमृत्युञ्जयनमोस्तु
ते॥२४॥ क्षयङ्करोषिपापानाम्पुण्यानामपिवर्द्धनम्॥ हेतुस्त्वंश्रेयसान्नित्यंमृत्युञ्जयनमोस्तुते॥२५॥सर्व्व
मायाकलातीतसर्वेन्द्रियपरावर॥सर्व्वेन्द्रियकलाधीशमृत्युञ्जयनमोस्तुते॥२६॥ रूपङ्गन्धोरसःस्पर्शः श
ब्दःसंस्कारएवच॥ त्वत्तःप्रकाशएतेषांमृत्युञ्जयनमोस्तुते॥२७॥ चतुर्व्विधानांसृष्टीनांहेतुस्त्वङ्कारणेश्वर॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

भावाभावपरिच्छिन्न मृत्युञ्जयनमोस्तुते ॥२८॥ त्वमेकोनिष्कलोलोकेसकलम्भुवनत्रयम् ॥ अतिसूक्ष्मा
तिरूपस्त्वम्मृत्युञ्जयनमोस्तुते ॥ २९ ॥ त्वम्प्रबोधस्त्वमाधारस्त्वद्बीजम्भुवनत्रयम्॥ सत्त्वंरजस्तमस्त्वंहि
मृत्युञ्जयनमोस्तुते ॥ ३० ॥ त्वंसोमस्त्वन्दिनेशश्चत्वमात्माप्रकृतेःपरः ॥ अष्टत्रिंशत्कलानाथमृत्युञ्जयन
मोस्तुते ॥३१॥ सर्व्वेन्द्रियाणामाधारः सर्व्वभूतगुणाशयः॥सर्व्वज्ञानमयानन्तमृत्युञ्जयनमोस्तुते ॥३२॥
त्वमात्मासर्व्वभूतानांगुणानान्त्वमधीश्वरः ॥ सर्व्वानन्दमयाधारमृत्युञ्जयनमोस्तुते॥३३॥त्वँय्यज्ञः सर्व्व
यज्ञानान्त्वम्बुद्धिर्बोधलक्षणा ॥ शब्दब्रह्मत्वमोङ्कारोमृत्युञ्जयनमोस्तुते॥३४॥ श्रीसदाशिव उवाच ॥ सए
वङ्कीर्तयेद्यस्तुशुचिस्तद्गतमानसः ॥ भक्त्याशृणोतियोब्रह्मन्नसमृत्युवशोभवेत् ॥ ३५ ॥ नतुमृत्युभयन्तस्य
प्राप्तकालञ्चलंघयेत ॥ अपमृत्युभयंतस्यप्रणश्यतिनसंशयः ॥३६॥ व्याधयोनोपपद्यन्तेनोपसर्ग्गभयम्भवे
त् ॥ प्रत्यासन्नान्तरेकालेशतैकावर्त्तनेकृते ॥ ३७ ॥ मृत्युर्न्नजायतेतस्यरोगान्मुञ्चतिनिश्चितम् ॥ पञ्चम्यां
वादशम्यांवापौर्णमास्यामथापिवा ॥ ३८ ॥ शतमावर्त्तयेद्यस्तुशतवर्षंसजीवति ॥ तेजस्वीबलसम्पन्नोल
भतेश्रियमुत्तमाम् ॥ ३९ ॥ त्रिविधंनाशयेत्पापंमनोवाक्कायसम्भवम् ॥ अभिचाराणिकर्माणिकर्माण्या

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

थर्वणानिच ॥ क्षीयन्तेनात्रसंदेहो दुःस्वप्नश्चविनश्यति ॥ ४० ॥ इदंरहस्यंपरमन्देवदेवस्यशूलिनः ॥ दुः स्वप्ननाशनंपुण्यंसर्वविघ्नविनाशनम् ॥ ४१ ॥ इति श्रीशिवब्रह्मसंवादे श्रीमृत्युञ्जयस्तोत्रं सम्पूर्णम् ॥

श्रीगणेशाय नमः ॥ ॥ अथ परापूजाप्रारभ्यते॥ पूर्णस्यावाहनंकुत्रसर्वाधारस्यचासनम् ॥ स्वच्छस्य पाद्यमर्घ्यं च शुद्धस्याचमनं कुतः ॥ १ ॥ निर्मलस्यकुतः स्नानं वस्त्रं विश्वोदरस्य च ॥ निरालम्बस्यो पवीतं पुष्पं निर्वासनस्य च ॥ २ ॥ निर्लेपस्य कुतो गन्धो रम्यस्याभरणं कुतः ॥ नित्यतृप्तस्य नैवेद्यं ताम्बूलं च कुतो विभोः ॥ ६ ॥ प्रदक्षिणा ह्यनन्तस्य ह्यद्वयस्य कुतो नतिः ॥ वेदवाक्यैरवेद्यस्य कुतः स्तोत्रं विधीयते ॥ ४ ॥ स्वयंप्रकाशमानस्य कुतो नीराजनं विभोः ॥ अन्तर्बहिश्चपूर्णस्य कथमुद्वासनं भवेत् ॥ ५ ॥ एवमेव परा पूजासर्वावस्थासु सर्वदा ॥ एकबुद्ध्या तु देवेशे विधेयाब्रह्मकाङ्क्षिभिः ॥६॥ इति परापूजा समाप्ता ॥ ॥

अथ कैवल्योपनिषत् ॥ ॥ कैवल्योपनिषद्वेद्यं कैवल्यानन्दतुन्दिलम् । कैवल्यगिरिजारामं स्वमात्रं कलयेऽन्वहम् ॥ ॐ सह नाववन्त्विति ॥ शान्तिः ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ॐ अथाश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच । अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् । यथा चिरात्सर्व्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् ॥ १॥ तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवैहि । न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ २ ॥ परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥ ३ ॥ ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे । विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवाशिरः शरीरः ॥ ४ ॥ अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य । हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विषदं विशोकम् ॥ ५ ॥ अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ ६ ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ ७ ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः सचंद्रमाः ॥८॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् । ज्ञात्वा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ ९॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ १० ॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ज्ञाननिर्मथनाभ्यासात्पापं दहति पण्डितः ॥ ११ ॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्रियन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति ॥ १२ ॥ स्वप्ने स जीवः सुखदुःखभोक्ता स्वमायया कल्पितजीवलोके । सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥ पुनश्च जन्मान्तरकर्म्मयोगात्स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रीडति यश्च जीवस्ततः सुजातं सकलं विचित्रम् ॥ ॥१४ ॥ आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ १५ ॥ यत्परं ब्रह्म सर्व्वात्मा विश्वस्यायतनं महत् । सूक्ष्मात्सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत् ॥ १६ ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते । तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥१८॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्व्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥ इति प्रथमः खण्डः ॥ १ ॥

अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विचित्रम् ॥ पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ १ ॥ अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः । अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥ २ ॥ वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् । न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ॥ ॥ ३ ॥ न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ! एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ॥४॥ समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥ यः शतरुद्रियमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आत्मपूतो भवति स सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्वित्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

विदित्वैनं कैवल्यं पदमश्नुते ॥ कैवल्यं पदमश्नुते इति ॥ ५ ॥ ॥ इति द्वितीयः खण्डः ॥ २ ॥ ॐ सह नाववत्विति शान्तिः ॥ ॥ इत्यथर्ववेदे कैवल्योपनिषत्समाप्ता ॥ १२ ॥

पुस्तकमिदं खेमराज–श्रीकृष्णदास–श्रेष्ठिना मुम्बय्यां स्वकीये

"श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयेऽङ्कयित्वा प्रकाशितम् ।

संवत् १९६३, शके १८२८.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

ॐ अथाश्वलायनो भगवन्तं परमेष्ठिनमुपसमेत्योवाच । अधीहि भगवन् ब्रह्मविद्यां वरिष्ठां सदा सद्भिः सेव्यमानां निगूढाम् । यथा चिरात्सर्व्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान् ॥ १॥ तस्मै स होवाच पितामहश्च श्रद्धाभक्तिध्यानयोगादवैहि । न कर्म्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥ २ ॥ परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो विशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ॥ ३ ॥ ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे । विविक्तदेशे च सुखासनस्थः शुचिः समग्रीवाशिरः शरीरः ॥ ४ ॥ अन्त्याश्रमस्थः सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य । हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विषदं विशोकम् ॥ ५ ॥ अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् । तमादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥ ६ ॥ उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ ७ ॥ स ब्रह्मा स शिवः सेन्द्रः सोऽक्षरः परमः स्वराट् । स एव विष्णुः स प्राणः स कालोऽग्निः सचंद्रमाः ॥८॥ स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् । ज्ञात्वा

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥ ९॥ सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । सम्पश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥ १० ॥ आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ज्ञाननिर्मथनाभ्यासात्पापं दहति पण्डितः ॥ ११ ॥ स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् । स्त्रियन्नपानादिविचित्रभोगैः स एव जाग्रत्परितृप्तिमेति ॥ १२ ॥ स्वप्ने स जीवः सुखदुःखभोक्ता स्वमाययाकल्पितजीवलोके । सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति ॥ १३ ॥ पुनश्च जन्मान्तरकर्म्मयोगात्स एव जीवः स्वपिति प्रबुद्धः । पुरत्रये क्रीडति यश्च जीवस्ततः सुजातं सकलं विचित्रम् ॥ ॥१४ ॥ आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च ॥ एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी ॥ १५ ॥ यत्परं ब्रह्म सर्व्वात्मा विश्वस्यायतनं महत् । सूक्ष्मात्सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत् ॥ १६ ॥ जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत्प्रकाशते । तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥ त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

यद्भवेत् । तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥१८॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्व्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ १९ ॥ इति प्रथमः खण्डः ॥ १ ॥

अणोरणीयानहमेव तद्वन्महानहं विश्वमहं विचित्रम् ॥ पुरातनोऽहं पुरुषोऽहमीशो हिरण्मयोऽहं शिवरूपमस्मि ॥ १ ॥ अपाणिपादोऽहमचिन्त्यशक्तिः पश्याम्यचक्षुः स शृणोम्यकर्णः । अहं विजानामि विविक्तरूपो न चास्ति वेत्ता मम चित्सदाहम् ॥ २ ॥ वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् । न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ॥ ॥ ३ ॥ न भूमिरापो न च वह्निरस्ति न चानिलो मेऽस्ति न चाम्बरं च ! एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ॥४॥ समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥ यः शतरुद्रियमधीते सोऽग्निपूतो भवति स वायुपूतो भवति स आत्मपूतो भवति स सुरापानात्पूतो भवति स ब्रह्महत्यायाः पूतो भवति स सुवर्णस्तेयात्पूतो भवति स कृत्याकृत्यात्पूतो भवति तस्मादविमुक्तमाश्रितो भवत्वित्याश्रमी सर्वदा सकृद्वा जपेत् ॥ अनेन ज्ञानमाप्नोति संसारार्णवनाशनम् । तस्मादेवं

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

विदित्वैनं कैवल्यं पदमश्नुते ॥ कैवल्यं पदमश्नुते इति ॥ ५ ॥ ॥ इति द्वितीयः खण्डः ॥ २ ॥ ॐ सह नाववत्वितिशान्तिः ॥ ॥ इत्यथर्ववेदे कैवल्योपनिषत्समाप्ता ॥ १२ ॥

पुस्तकमिदं खेमराज–श्रीकृष्णदास–श्रेष्ठिना मुम्बय्यां स्वकीये

"श्रीवेङ्कटेश्वर" स्टीम्–मुद्रणालयेऽङ्कयित्वा प्रकाशितम् ।

संवत् १९६३, शके १८२८.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

जाहिरात।

नाम.	की. रु. आ.
संस्कारभास्कर (यजुर्वेदी सब संस्कारोंकी विधि प्रयोग और मंत्र सहित) ..	२–१२
जन्मदिनपूजापद्धति	०–२
गोदानपद्धति	०–१॥
पूजापंकजभास्कर	२–०
सकामशिवपूजनविधान भा. टी. ..	०–४
स्वस्तिवाचन (पुण्याहवाचन)	०–१॥
दशकर्मपद्धति	०–७

नाम.	की. रु. आ.
वासिष्ठीहवनपद्धति	०–४
लंबोदरिहवनपद्धति	०–४
एकोद्दिष्टश्राद्धप्रयोग	०–२
पार्वणश्राद्धप्रयोग	०–२
उपाकर्मपद्धति (श्रावणीयजुर्वेदकी)	०–१२
कर्मविपाकचरणगत रफ़ १०आना ग्लेज	०–१२
कर्मविपाक भाषाटीका	१–४
वेदोक्तवास्तुपद्धति.	०–६

पुस्तक मिलनेका ठिकाना–खेमराज श्रीकृष्णदास, "श्रीवेङ्कटेश्वर" स्टीम् प्रेस–मुम्बई.

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

CC-0.Jangamwadi Math Collection. Digitized by eGangotri

॥ इति वेदोक्तशिवार्चनं सम्पूर्णम् ॥

CC-0.Jangamwadi Math Collection. Digitized by eGangotri